शास्त्री-I साहित्य

अभिज्ञानशाकुन्तलम्

नाट्यशास्त्र के कुछ पारिभाषिक शब्द

विष्कम्भक → विष्कम्भक नाटक के किसी भी अङ्क के आदि में आने वाला वह भाग है जिसमें मध्यम श्रेणी के दो पात्रों द्वारा पारस्परिक वार्तालाप में बीती हुई या आनेवाली नाटकीय कथा वस्तु से सम्बद्ध घटनाओं की सूचना दी जाती है।

विष्कम्भक दो प्रकार का होता है, एक शुद्ध विष्कम्भक दूसरा संकीर्ण विष्कम्भक शुद्ध विष्कम्भक उसे कहते हैं, जिसमें एक या दो पात्र माध्यम श्रेणी के हो और संस्कृत भाषा का ही प्रयोग करते हों। सङ्कीर्ण विष्कम्भक वह होता है जिसमें एक पात्र मध्यम श्रेणी का हो तथा दूसरा निम्न श्रेणी का। इसमें प्राकृत तथा संस्कृत दोनों भाषाओं का प्रयोग होता है—

वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः।
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः॥
मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः।
शुद्धः स्यात् स तु संकीर्णो नीचमध्यप्रकल्पितः॥

Renu Devi
13/08/20
राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया।

Page No.

उपशास्त्री - II साहित्य - तृतीय - पत्रम्

रघुवंश महाकाव्यम्

द्वितीयः सर्गः

(1) प्र० - पद्यमिदम् व्याख्येयम् ।

तद्रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि कालिदासप्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके सिंहः राजा दिलीपं प्रत्युवाच - राजन्! तस्मात् नानाश्रेयपरम्परासाधनं सुखैकनिकेतनं स्वं शरीरं क्षुद्रवस्तु गोविनिमये त्वं मा त्याक्षीः, ऐन्द्रस्य पदस्य चक्रवर्तिपदानतिरेकात् । विपश्चितः सम्पन्नं राज्यं भौमं स्वर्गं कथयन्ति ।

व्याख्याः - तत् = तस्मात् कारणात्, कल्याणपरम्पराणां = सुखसन्ततीनां, मङ्गलसमूहानाम्, भोक्तारं = अनुभवितारम्, ऊर्जस्वलं = बलवन्तं सर्वसाधनं वा, आत्मदेहं = स्वशरीरम्, रक्ष = परिपालय, मा त्याक्षीः, हि = यतः, ऋद्धं = समृद्धम्, राज्यं = भूमण्डलाधिपत्यम्, पदं = स्वर्गस्थानम्, आहुः = कथयन्ति, परावरज्ञा मनीषिणः, इति शेषः ।

Renu Devi
13/08/20
राधाउमाकान्त सं० महावि० सुखसेना, पूर्णिया ।

शेष भाग

शास्त्री - II साहित्य

मेघदूतम्

Saathi

Date ___/___/___

प्र० (1) मेघदूतं गीतिकाव्यमिति मतं समालोचयन्तु ।

उत्तरम् - मेघस्य गर्जनमतीव मनोहर ध्वनियुक्तमस्ति । तथैव काव्यध्वनिरप्यत्यन्तो गम्भीरो मर्मस्पर्शी चास्ति । ध्वनिरेव काव्यस्य प्राणः । यक्षः कथं स्वकर्तव्याच्च्युतो जातः, तस्य कनकवलयं भ्रष्टमिति सहृदयाः पाठका एवावगन्तुं प्रभविष्यन्ति दुःसहग्रीष्मस्यावसाने मेघालोके सति मानवहृदये तप्राप्ति विशेषतः प्रणयिप्रणयिन्योर्हृदये कीदृशी भावधारा प्रवहति विषयोऽयं सहृदयस्य मनुष्यस्य हृदयेनैव संवेद्यो भवितुमर्हति । महाकवि कालिदासेन मेघदूतस्य पूर्वमेघ भागे केवलमुद्दीपकपदार्था एव वर्णिताः, उत्तरमेघे अलकापुरी, यक्षगृहम्, तस्य प्राणेश्वरी प्रियतमा चेति तस्य वर्णनीयाः विषयाः सन्ति । एवम् महाकविना कालिदासेन सम्भोगश्रृङ्गारस्य पृष्ठे यथं शापप्रवासमूलकस्य विप्रलम्भश्रृङ्गारस्याऽतिमनोहरम्प्रदर्शनं विहितम् ।

महाकविः कालिदासो यद्यप्यनेकेषां छन्दसां प्रयोगे सिद्धहस्तः, तथापि, तेन मेघदूते श्रुतिमधुरं मन्दाक्रान्ताछन्दोऽवलम्बितम् । कालान्तरे प्रायः सर्वेषु दूतकाव्येषु एतस्यानुकरणम्प्रारब्धम् । दूतकाव्यस्याऽस्य नायको यक्षो विरहकातरोऽस्ति । शोकदुःखवशात् तस्य क्रियाशक्तिर्नितान्तं मन्दायिता । अत एव सः विहागवत् करुणे मर्मस्पर्शिनि च स्वरे मन्दाक्रान्तावृत्ते शनैः शनैः कान्तं प्रति प्रेषणाय संदेशं प्रतिपादयति । अत्र हार्दिभावेन सह छन्दसोऽपूर्वं साहचर्यं संवृत्तम् । काव्यस्य ध्वनिश्छन्दो रीतयो यक्षस्य करुणकण्ठे मिश्रितो भूत्वैकस्याऽपूर्वस्य काव्यस्य सृष्टिर्जाता । महाकविना कालिदासेन प्रकृतेर्मनोरमैर्भव्यैश्च चित्रैः स्वकीया कृतिरियं सज्जीकृता । परन्तु लोकोत्तरेऽस्मिन् काव्ये न केवलं

Page No.

शेष प्रश्नः आगे

उपशास्त्री-I साहित्य - तृतीय-पत्रम्
रघुवंश महाकाव्यम् - द्वितीयः सर्गः

Date ___/___/______

प्र०(1)- स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्तयितुं प्रसीद ।
दिनावसानोत्सुक बालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥

उत्तरम्:- प्रस्तुतोऽयं श्लोकः महाकवि कालिदास प्रणीतस्य रघुवंश महाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति ।

अस्मिन् श्लोके राजा दिलीपः सिंहम्प्रत्युवाच - हे मृगराज! भगवतः शिवस्यानुशासनस्य गुरोः धनस्य चावश्यं पालनीयतया भवन्तं प्रार्थये यत् मम शरीरेण पारणां कुरु, सायमस्या बुभुक्षितः समुत्सुकश्च बालवत्सः एनां प्रतीक्षते । मातृदुग्धमेव तस्यास्ति प्रधानमाहारः । अतः कृपया एनां मुञ्च । एवं कर्तुं प्रसन्नो भवेति भावः ।

व्याख्याः- सः = अङ्कागतसत्ववृत्तिः, त्वं = भवान्, मदीयेन = मामकीयेन देहेन = शरीरेण; शरीरवृत्तिं = प्राणधारणम्, उदरपूरणं वा, निर्वर्तयितुं = सम्पादयितुं, प्रसीदं = कृपां कुरु, दिनावसानोत्सुकबालवत्सा = सायमुत्कण्ठित बालशिशुः, महर्षेः = वसिष्ठस्य, इयं धेनुः = नन्दिनी, विसृज्यतां = मुच्यताम् ।

Renu Devi
13/08/20
राधा उमाकान्त सं० महावि० सुरवसेना,
पूर्णिया ।

शेष भाग:

मेघदूतम्

Saathi

प्रकृतेरेव मनोरमं चित्रमस्ति, अपितु तत्र चरित्रस्यानुकरणीय आदर्शोऽप्युपलभ्यते।

मेघदूतस्य नायको यक्षो देवयोनिविशेषः अलकापूर्याः सः नागरिकः। स्वर्गवदलकापुरी अपि केवलं भोगभूमिर्न कर्मभूमिः, यक्षयोनिश्चापि केवलं भोगयोनिर्न कर्मयोनिः। अस्यामवस्थायां शापितः स यक्षो मर्त्यलोकेऽपि नरलोकस्य कयाचिद् रमण्या परिणयं विधाय तत्सहवासेन शापकालं यापयितुमर्हति स्म, किन्तु तेनैतन्न विहितम्, अपित्वेकपत्नीव्रतस्य व्रती भूत्वा विक्षिप्तप्रायतया तेन स्वशापकालो यापितः। एवं तत्पत्न्यऽपि सहधर्मिण्याः धर्मस्योत्कृष्टमाचरणं विधाय सतीव्रतमक्षतं स्थापितम्। एवमस्मिन् काव्यरत्ने उत्कृष्टस्यादर्शस्यापि परिचय उपलभ्यते। अत एव प्रो० मैकडॉनलमहोदयेनैतत् काव्य-गीतिकाव्यम् (Lyric) इत्युक्तम्, तत सर्वथा समीचीनमेव प्रतीयते

Renu Devi
13/08/20

राधा उमाकान्त सं० महावि० सुखसेना, पूर्णिया